कमलप्रकाशके सूर्य्ये। पद्मिनीनाथतत्पत्यादयोऽप्यत्र।

अ(द्द)ब्द पु० अवति रक्षति सीमानं दन्। १ पर्वतभेदे स च वर्षपर्वत एव तद्भेदः वर्षपर्वतशब्दे वक्ष्यते। अपोददाति दा–क ६ त०। २मेघे ३मुस्तायां च तस्याश्चात्यन्तशीतवीर्य्यत्वेन वैद्यकोक्तेः जलमयमूलत्वाच्च तथात्वम्। आप्यन्ते व्याप्यन्ते ऋतुमासपक्षतिथिनक्षत्रयोगकरणवारादयो येन आप–दन् ह्रस्वश्च "अ(ब्दा)ब्दादयश्च" उ०नि०। ४वत्सरे। स च नवविधः। "ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं गुरोस्तथा सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नवेति" सू०सि० उक्तेः तत्र ब्राह्माब्दमानम् "सूर्य्याब्दसंख्यया द्वित्रिसागरैरयुताहतैः सन्ध्यासन्ध्यंशसहितं विज्ञेयं तच्चतुर्युगम् इत्थं युगसहस्रेण भूतसंहारकारकः कल्पो ब्राह्ममहः प्रोक्तं शर्वरी तस्य तावतीति" "परमायुः शतं तस्य तयाहोरात्रसंख्यया" इति च सू०सि। तथाच सौरैः(४३२००००००) एतावद्वर्षैस्तस्याहस्तावद्भिश्च रात्रिः तेन द्विगुणितैस्तैः ३६० गुणितैर्ब्राह्माब्दमानम्। अथ दिव्यम् "मासैर्द्वादशभिर्वर्षं दिव्यं तदहरुच्यते तत्षष्टिः षड्गुणा दिव्यं वर्षमासुरमुच्यते" इति तत्रोक्तेः ३६० सौरवर्षैर्दिव्याब्दमानम् "मन्वन्तरव्यवस्था च प्राजापत्यमुदाहृतम् न तत्र द्युनिशोर्भेद" इति तत्रोक्तम् मन्वन्तरमानमेव प्राजापत्याब्दमानम् तच्च "युगानां ४३२०००० सप्ततिः सैका मन्वन्तरमुदाहृतम्" इत्युक्तम् तेन७१ गुणितैः ३११०४०००सौरवर्षैः प्राजापत्यम्। पित्र्यं तु "त्रिंशता तिथिभिर्मासश्चान्द्रः पित्र्यमहः स्मृतम् निशा च मासपक्षान्तौ तयोर्मध्ये विभागतः" इत्युक्तेः चान्द्रमास एव पित्र्यमहोरात्रं तच्च ३६० गुणितं तद्वर्षमानम् तथाच १०८०० चान्द्रदिनैः पित्र्यवर्षमानमितिफलितम्। वार्हस्पत्यन्तु "वैशाखादिषु कृष्णे च योगः पञ्चदशे तिथौ। कार्त्तिकादीनि वर्षाणि गुरोरस्तोदयात् तथा" सू०सि० "यया पौर्णमास्यां नक्षत्रसम्बन्धेन तत्संज्ञो मासो भवति तथेति समुच्चयार्थकम्। वृहस्पतेः सूर्य्यसान्निध्यदूरत्वाभ्यामस्तादुदयाद्वा वैशाखादिषु द्वादशसु मासेषु कृष्णपक्षे पञ्चदशे तिथौ अमायामित्यर्थः। चकारः पौर्णमासीसम्बन्धात् समुच्चयार्थकः। योगो दिननक्षत्रसम्बन्धः कार्तिकादीनि द्वादश वर्षाणि भवन्ति। वैशाखकृष्णपक्षपञ्चदश्याममावास्यायां वृहस्पतेरस्ते उदये वा जाते सति तदादि वृहस्पतिवर्षं कृत्तिकादिनक्षत्रसम्बन्धात् कार्त्तिकसंज्ञम्। एवं ज्यैष्ठाषाढश्रावणभाद्रपदाश्विनकार्त्तिकमार्गशीर्षपौषमाघफाल्गुनचैत्रामासु क्रमशो मृगपुष्यमघापूर्वफाल्गुनीचित्राविशाखाज्येष्ठापूर्व्वाषाढाश्रवणापूर्वभाद्राश्विनीनक्षत्रसम्बन्धान्मार्गशीर्षादीनि भवन्ति। अत्रापि नक्षत्रद्वयत्रयसम्बन्धः चान्द्रमासवत् बोध्यः। तच्च मासशब्दे दृश्यम् तेन यद्दिने वृहस्पतेरुदयोऽस्तो वा तद्दिने यच्चन्द्राधिष्ठितनक्षत्रं तत्संज्ञं वार्हस्पत्यं वर्षं भवतीति तात्पर्य्यम्। मेषादिसंक्रान्तीरुक्त्वा "मेषादयो द्वादशैव सौरमाने तु वत्सर" इति "सौरन्तु तद्भवेन्मानं भानोर्भगणपूरणादिति" चोक्तेः ३६० सौरदिवसैः सौरवर्षमानम्। सावनन्तु "उदयादोदयं भानोः सावनं तत्प्रकीर्त्तित"मित्युक्तम्। "पञ्चाङ्गरामास्तिथयः खरामाः सार्द्धद्विदस्राः कुदिनाद्यमब्दे" इति सि०शि० उक्तेः ३६५, दिनानि १५,३०,२२,३०, दण्डादिसहितानि सावनदिनानि "अस्यार्कमासोऽर्कलवः प्रदिष्टस्त्रिंशद्दिनः सावनमास" इति सि०शि० उक्तदिशा तन्मासादयोज्ञेयाः। "त्रिंशता तिथिभिर्मासश्चान्द्र इति" प्रागुक्तं चान्द्रमानम् तच्च "कालेन येनैति पुनःशशीनं क्रामन् भचक्रं विवरेण गत्योः मासः स चान्द्रोऽङ्कयमाः कुरामाः शून्येषवस्तत् कुदिनप्रमाणम्" इति सि०शि० उक्तेः २१।५० दण्डादियुतैरेकोनत्रिंशत्कुदिनैश्चान्द्रमासः द्वादशगुणिते च तस्मिन् ३५४।१८ कुदिनैश्चान्द्रबर्षमानम् चान्द्रमासविशेषाः मासशब्दे वक्ष्यन्ते। नाक्षत्रं यथा "भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते" सू०सि० नित्यं प्रत्यहं भचक्रभ्रमणं नक्षत्रसमूहस्य प्रवहवायुकृतः परिभ्रमः नाक्षत्रं नक्षत्रसंवन्धि दिनम्। एवं नवसु ब्राह्मादिषु वर्षेषु दर्शितेषु चतुर्णामेव व्यवहारोपयोगिता यथोक्तं "चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः वार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यश" इति सू०सि०। तत्र कस्य कुत्रोपयोगस्तदप्युक्तं तत्रैव। "सौरेण द्युनिशोर्मानं षड़शीतिमुखानि च अयनं विषुवच्चैव संक्रान्तेः पुण्यकालता" इति "तिथिःकरणमुद्वाहः क्षौरं सर्व्वक्रियास्तथा व्रतोपवासयात्राणां क्रिया चान्द्रेण गृह्यते" इति "सावनानि स्युरेतेन यज्ञकालविधिस्तु तैः सूतकानां परिच्छेदोदिनमासाब्दपास्तथा मध्यमग्रहभुक्तिश्च सावनेनैव गृह्यते" सू०सि०। चान्द्रेण तु मासवर्षादिगणनापि "चैत्रे मासि जगत्स्रष्टा ससर्ज प्रथमेऽहनि शुक्लपक्षे समग्रन्तु महतारोदये सति प्रवर्त्तयामास तदा कालस्य गणनामपि ग्रहान् राशीन्टतून् मासान् वत्सरान् वत्सराधिपान्" इति म०त० ब्र०पु०। "यत्राब्दे पुण्यसहस्रं शुभं सोऽब्दः शुभप्रदः" इति नी०ता०।